## २५

गृत्समद (आङ्गिरसः शौनहोत्रः पश्चाद्) भार्गवः शौनकः।ब्रह्मणस्पतिः। जगती।

**इन्धानो अग्निं वनवद्वनुष्यतः कृतब्रह्मा शूशुवद्रातहव्य इत्।**

**जातेन जातमति स प्र सर्सृते यंयं युजं कृणुते ब्रह्मणस्पतिः॥ २.०२५.०१**

यंयम्- यम्। ब्रह्मणस्पतिः- मेधाधिदेवता। युजम्- योगिनम्। कृणुते- कुरुते। सः। अग्निम्- पावकं क्रतुम्। इन्धानः- उद्दीपयन्। वनुष्यतः- सम्भक्तुः। वनवत्- सम्भक्ता भवति। कृतब्रह्मा- सज्जीकृतमेधामन्त्रः। रातहव्यः- दत्तहविष्कः। शूशुवत्- वर्धते। टुओश्वि गतिवृद्ध्योः। जातेन- आविर्भूतया प्रतिभया। जातम्- तदनु आविर्भूतां प्रतिभाम्। अति प्र सस्रृते- प्रसरति। प्रतिभामनु प्रतिभां लभत इति भावः ॥१ ॥

**वीरेभिर्वीरान्वनवद्वनुष्यतो गोभी रयिं पप्रथद्बोधति त्मना।**

**तोकं च तस्य तनयं च वर्धते यंयं युजं कृणुते ब्रह्मणस्पतिः॥ २.०२५.०२**

यंयं युजं कृणुते ब्रह्मणस्पतिः। सः। वीरेभिः- वीरैः। वनुष्यतो वीरान्- सम्भक्तॄन् वीरान्। वनवत्- सम्भजति। गोभिः- चिद्रश्मिभिः। रयिम्- स्वसम्पदम्। पप्रथत्- विस्तारयति। त्मना- स्वरूपेण। बोधति- बुध्यति बोधयति च। तोकं च तस्य तनयं च वर्धते- स्वसन्ततिं स्वधर्ममार्गे वर्धयति च ॥२ ॥

**सिन्धुर्न क्षोदः शिमीवाँ ऋघायतो वृषेव वध्रीँरभि वष्ट्योजसा।**

**अग्नेरिव प्रसितिर्नाह वर्तवे यंयं युजं कृणुते ब्रह्मणस्पतिः॥ २.०२५.०३**

सिन्धुः- नदी। न क्षोदम्- कूलमिव। वृषा- वीर्यवान्। वध्रीरिव- युद्ध्यतो वीर्यरहितानिव। शिमीवान्- कर्मवान् बृहस्पतिः। ओजसा- स्वबलेन। ऋघायतः- हिंसकान्। वष्टि- अभिभवितुं

Dr. Rangaji

WEBOLIM

कामयते। अग्नेः प्रसितिः- अग्नेर्ज्वालालातचक्रं वा। वर्तवै न- यथा निवारयितुं न भवति तथा भवति ॥३॥

**तस्मा॑ अर्ष॑न्ति दि॒व्या अ॑स॒श्चत॒ः स सत्व॑भिः प्रथ॒मो गोषु॑ गच्छति।**
**अनि॑भृष्टतविषिर्ह॒न्त्योज॑सा॒ यंयं॒ युजं॑ कृ॒णुते ब्रह्म॑ण॒स्पति॑ः॥ २.०२५.०४**

तस्मै। दिव्याः। असश्चतः- असङ्गता आपः। अर्षन्ति- सरन्ति। सः। प्रथमः- मुख्यतया। सत्वभिः- स्वबलैः। गोषु- चिद्रश्मिषु। गच्छति। अनिभृष्टतविषिः- अबाधितबलः सन्। ओजसा- बलेन। हन्ति- वृत्राणि नाशयति ॥४॥

**तस्मा॒ इद्विश्वे॑ धुनयन्त॒ सिन्ध॒वोऽच्छि॑द्रा॒ शर्म॑ दधिरे पु॒रूणि॑।**
**दे॒वानां॑ सु॒म्ने सु॒भग॒ः स एध॑ते॒ यंयं॒ युजं॑ कृ॒णुते ब्रह्म॑ण॒स्पति॑ः॥ २.०२५.०५**

तस्मै। इत्- एव। विश्वे- सर्वाः। सिन्धवः- आपो मूलशक्तिधाराः। धुनयन्त- सरन्ति। पुरूणि- प्रभूतानि। अच्छिद्रा- छिद्ररहितानि। शर्म- मङ्गळानि। दधिरे- धृतवत्यः। देवानाम्- द्योतनशक्तीनाम्। सुम्ने- आनन्दे। सुभगः- सौभाग्यवान्। सः। एधते- वर्धते ॥५॥

Dr. Rangaji
WEBOLIM